दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-73 | 1 | जनवरी 04, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघकृष्णप्रतिपदा
पौषः 20 प्रविष्टांशः मङ्गलमयः भवेत्

2 अमरीकीय-आक्रमणानां सूचनानां मध्ये वेनेजुएला देशेन राष्ट्रिय-आपत्कालः घोषितः

3 मुख्यमन्त्री कण्डाघाटे विकलांगशिक्षायां उत्कृष्टताकेन्द्रस्य आधारशिला अस्थापयत् ₹२०० कोटिरूप्यकैः भविष्यति निर्माणम्

5 पौषपूर्णिमायां प्रथमस्नानपर्वणि कोटिशः भक्ताः संगमे पवित्रं स्नानं कृतवन्तः

## भगवता बुद्धेन दर्शितः मार्गः प्रज्ञा च मानवतायाः कृते अस्ति तथा च तस्य पवित्राणि अवशेषानि केवलं कलाकृतयः न, अपितु देशस्य पूज्यधरोहरस्य अभिन्नाः भागाः सन्ति - प्रधानमन्त्री नरेन्द्रमोदी




**हिमसंस्कृतवार्ताः -** प्रधानमन्त्री नरेन्द्रमोदी भगवतः बुद्धस्य पवित्र-पिपरहवा-अवशेषाणां प्रदर्शनीम् उद्घाटितवान्। असौ उक्तवान् यत् भगवता बुद्धेन दर्शितः मार्गः प्रज्ञा च मानवतायाः कृते अस्ति तथा च तस्य पवित्राणि अवशेषानि केवलं कलाकृतयः न, अपितु देशस्य पूज्यधरोहरस्य अभिन्नाः भागाः सन्ति। एते अवशेषाः देशस्य सभ्यतायाः अभिन्नः भागः इति सः वर्णितवान्। श्रीमोदिना नवदिल्ली-नगरे राय-पिठोरा-सांस्कृतिक-सङ्कुलस्य भगवद्बुद्धस्य पिपरहवा पवित्रावशेषाणां भव्यायाः अन्ताराष्ट्रिय-प्रदर्शन्याः उद्घाटनं कृतम्। "प्रकाश और कमल; जागृत व्यक्ति के अवशेष" इति शीर्षकेण सः प्रदर्शनीसूच्याः अपि अनावरणं कृतवान् । बहुप्रतीक्षानन्तरं देशस्य धरोहरः पुनः आगतः इति प्रधानमन्त्रिणा उक्तम्। सः अवदत् यत् अद्यारभ्य देशस्य जनाः भगवतः बुद्धस्य एतानि पवित्राणि अवशेषाणि द्रष्टुं शक्नुवन्ति, तेषां दिव्यं आशीर्वादं च प्राप्स्यन्ति । भारतं न केवलं भगवतः बुद्धस्य पवित्रावशेषाणां रक्षकः अपितु तस्याः शाश्वत-परम्परायाः जीवितं वाहक अपि इति श्रीमोदिना बोधितम्। बौद्धधरोहरस्य विषये प्रधानमन्त्रिणा उक्तं यत् भारतेन विश्वे बौद्ध-रिक्थ-स्थलानां विकासे योगदानं दातुं निरन्तरं प्रयत्नाः कृताः। बौद्धस्थलानां आधुनिकीकरणं क्रियते, तीर्थयात्रिणां कृते नूतनाः सुविधाः च निर्मायन्ते इति सः अवदत्।

## भगवतः बुद्धस्य शिक्षा मूलतः पालीभाषायां लिखिता - प्रधानमन्त्री

प्रधानमंत्रिणा उक्तं यत् भगवतः बुद्धस्य शिक्षा मूलतः पालीभाषायां लिखिताऽस्ति, तस्य सर्वकारस्य प्रयासः च पालीभाषां व्यापकदर्शकानां कृते सुलभं कर्तुं वर्तते। तेन उक्तं यत् पालीभाषा शास्त्रीयभाषायाः उपाधिना अलंकृता। अष्ट-नवति-अधिक-अष्टादश-शत-तमे वर्षे आविष्कृताः पिपरहवा-अवशेषाः प्रारम्भिकबौद्धधर्मस्य पुरातत्त्वाध्ययने महत्त्वपूर्णं स्थानं धारयन्ति। ते भगवद्बुद्धेन सह प्रत्यक्षतया सम्बद्धेषु प्राचीनतमेषु ऐतिहासिकदृष्ट्या च महत्त्वपूर्णेषु अवशेषेषु अन्यतमाः सन्ति । पुरातत्त्व-साक्ष्यं पिपरहवा-स्थलं प्राचीन-कपिल-वस्तुना सह सम्बद्धं करोति, यत्र भगवान् बुद्धः तपस्विनः कार्यं कर्तुं पूर्वं प्रारम्भिकजीवनं यापयति स्म। पिपरहवा अवशेषाः शताधिक कालानन्तरं भारतं प्रति प्रत्यागताः सन्ति । पिपरहवा-अवशेषाणां भागाः नवदिल्लीनगरस्य राष्ट्रियसङ्ग्रहालये कोलकातानगरस्य भारतीय-सङ्ग्रहालये च संरक्षिताः आसन् । केन्द्रीय-संस्कृति-मन्त्री गजेन्द्र सिंह शेखावतः अवदत् यत् एषः ऐतिहासिकः अवसरः सप्तविंशति-अधिक-एकशत्-वर्षेभ्यः परं भगवतः बुद्धस्य पिपरहवा-रत्नावशेषाणां पुनरागमनं भवति। सः अवदत् यत् एषः सम्पूर्णस्य राष्ट्रस्य कृते प्रेरणादायकः, गौरवस्य च विषयः अस्ति। श्रीशेखावतेन उक्तं यत् तस्य मन्त्रालयः देशस्य धरोहरस्य संरक्षणं कुर्वतः प्रधानमन्त्रिणः विकासस्य दृष्टेः अनुरूपं कार्यं कुर्वन् अस्ति। शेखावतः अवदत् यत् तस्य मन्त्रालयः देशस्य पुरातात्विक - संस्कृतिकरिक्थानां संरक्षणाय, पाण्डुलिपिनां डिजिटली इति आंककीय-करणाय, देशस्य सांस्कृतिकपरम्पराणां सुदृढीकरणाय च कार्यं कुर्वन् अस्ति। एषा प्रदर्शनी भगवतः बुद्धस्य शिक्षाभिः सह भारतस्य गहनं निरन्तरं च सम्बन्धं प्रकाशयति तथा च भारतस्य समृद्ध-आध्यात्मिक-सांस्कृतिक-रिक्थानां संरक्षणाय प्रधानमन्त्रिणः प्रतिबद्धतां प्रतिविम्बयति। एतेषां अवशेषाणां सम्प्रत्येव पुनरागमनं सर्वकारस्य निरन्तरप्रयत्नानाम्, संस्थागत सहकार्यस्य, अभिनव-सार्वजनिक-निजी-सहयोगस्य च माध्यमेन सम्भवम् अभवत्।

## सुभाषितम्

**गुणेष्वेव हि कर्तव्यः,
प्रयत्नः पुरुषैः सदा।
गुणयुक्तो दरिद्रोऽपि,
नेश्वरैरगुणैः समः।।
(मृच्छकटिकम्- ४/२२)**

अर्थात्- मनुष्यों को सदा गुणप्राप्ति का प्रयत्न करना चाहिए, क्योंकि गुणी दरिद्र भी गुणहीन धनिकों से बढ़कर है। भावार्थ है कि व्यक्ति को धन से ज्यादा संसार में गुणों के अर्जन में ही जोर देना चाहिए

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## छत्तीसगढ-राज्ये सुरक्षाबलेन सह जातयोः द्वयोः पृथक् पृथक् संघर्षयोः चतुर्दश माओवादिनः मारिताः

**हिमसंस्कृतवार्ताः -** छत्तीसगढ-राज्यस्य बस्तर सम्भागे सुरक्षाबलेन सह जातयोः द्वयोः पृथक् पृथक् संघर्षयोः चतुर्दश माओवादिनः मारिताः। षड्विंशति-उत्तर-द्विसहस्रतम वर्षस्य आरम्भे छत्तीसगढ राज्ये नक्सल्-विरोधि-क्षेत्रे सुरक्षाबलेन महती सफलता समर्जिता। एकः सङ्घर्षः सुकमा-मण्डलस्य कोण्टा-क्षेत्रे अभवत्, यस्मिन् द्वादश माओवादिनः मारिताः। द्वितीयं च बिजापुरमण्डलस्य बसाकुडा-क्षेत्रे अभवत्, यत्र द्वौ माओवादिनौ निष्प्रभावितौ अभवताम्। सुरक्षाबलेन संघर्ष-स्थलाभ्यां सर्वेषाम् मृतानां माओवादिनां शवाः प्राप्ताः। एतदतिरिच्य, ए. के.-47, एस्. एल्. आर्. रैफ़ल् इत्यादीनि शस्त्राणि अपि स्थानात् प्राप्तानि सन्ति। अपरत्र हैदराबादे विंशतिः माओवादिनः आत्मसमर्पणं कृतवन्तः ।

## पश्चिमबङ्गालस्य अन्तिममतदातृसूच्यां त्रयाणां आदिमानवजनजातीनां नाम समावेशयितुं निर्णयः कृतः निर्वाचनायोगेन

**हिमसंस्कृतवार्ताः -** निर्वाचनायोगेन पश्चिमबङ्गालस्य अन्तिममतदातृसूच्यां त्रयाणां आदिमानवजनजातीनां नाम समावेशयितुं निर्णयः कृतः। एतेषां त्रयाणां समुदायानाम् मतदातृणां कृते अस्य कृते स्वीयभिलेखानां प्रदानस्य आवश्यकता न भविष्यति। पश्चिमबङ्गालस्य निर्वाचनाधिकारिणां सूत्रानुसारं एताः जनजातयः बिरहोर, टोटो, साबर इत्येताः सन्ति ।

## वीजा-पासपोर्ट-कपट-प्रकरणेषु संलग्नानां जनानां उपरि कार्याचरणेन महत्त्वपूर्णोपलब्धिः प्राप्ता

**हिमसंस्कृतवार्ताः -** एकेन दलेन दिल्ली-आरक्षिबलस्य इन्दिरा-गान्धी-अन्ताराष्ट्रिय विमानस्थानकस्य पञ्चविंशत्यधिक द्विसहस्रतमे वर्षे वीजा-पासपोर्ट-कपट-प्रकरणेषु संलग्नानां जनानां उपरि कार्याचरणेन महत्त्वपूर्णोपलब्धिः प्राप्ता। दिल्ली आई.जी. आई-विमानस्थानकस्य उप-आरक्षक-आयुक्तः विचित्र-वीरः अवदत् यत् गतवर्षे देशस्य विभिन्नेषु भागेषु यात्रा-अभिकर्तृभिः, अवैधप्रवासाय सहायकैः च सह प्रायः त्रिंशोत्तरैकशतं जनाः निगडिताः सन्ति इति।

# गृहमन्त्री अमितशाहः अण्डमाननिकोबार-द्वीपसमूहे

## गृहमन्त्रालयस्य संसदीय-परामर्शसमितेः सभायाः अध्यक्षतां कृतवान्



**हिमसंस्कृतवार्ताः** - गृहमन्त्री अमितशाहः अण्डमाननिकोबारद्वीपसमूहे गृहमन्त्रालयस्य संसदीयपरामर्शसमितेः सभायाः अध्यक्षतां कृतवान्। उपवेशने राष्ट्रियसुरक्षा, आपद्प्रबन्धनम्, साइबरसुरक्षा, क्षेत्रीयअवसंरचना च इति एतेषु विषयेषु चर्चा अभवत् । गृहमन्त्री साइबरअपराधस्य निवारणाय बहुविधरणनीत्यां बलं दत्तवान्, यत्र समन्वयः, संचारः, क्षमतानिर्माणं च एते विषयाः सम्मिलिताः सन्ति । अण्डमान-निकोबारद्वीपसमूहस्य रणनीतेः महत्त्वविषये अपि पृथक् सत्रं आयोजितम् ।

# हिमाचलप्रदेश पंचायतनिर्वाचनम्- पंचायत- निर्वाचन- आयोजनार्थं राज्यसर्वकारेण उच्चन्यायालये किं निवेदितम्?

हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला । हिमाचलप्रदेशस्य उच्चन्यायालये शुक्रवासरे पंचायतीराजसंस्थानां समये निर्वाचनं भवेत् इति विषये प्रवेशितायाः याचिकायाः श्रवणं प्रायः त्रिहोराः यावत् अभवत्। श्रवणकाले राज्य-सर्वकारस्य पक्षतः न्यायालयाय निवेदितम् यत् पंचायतानां, जिलापरिषदां पुनर्सीमांकनविषये निर्गता अधिसूचना अन्येन खण्डपीठेन निरस्तीकृतमस्ति तथा जनानां आपत्तीनां पञ्जीकरणाय १० जनवरीपर्यन्तं समयः प्रदत्तः। एतादृशीषु परिस्थितिषु नियमानुसारं निर्वाचन-आयोजनाय न्यूनातिन्यूनं षट्-मासानाम् अतिरिक्तः कालः अपेक्षितः। अतः हिमाचलप्रदेशे समये निर्वाचनं कर्तुं न शक्यते इति कथितम्।

अन्यतः याचिकाकर्तृपक्षतः प्रस्तुतः वरिष्ठ-अधिवक्ता उक्तवान् यत् राज्यसर्वकारः ज्ञात्वैव निर्वाचन-आयोजने अनवाधानं करोति। या पुनर्सीमांकन-संबद्धा अधिसूचना निरस्ता कृताऽस्ति, सा केवलं शिमला-जिला-परिषद् सम्बद्धा एव अस्ति।

### सर्वपक्षीय-वाक्यानि श्रुत्वा न्यायालयस्य निर्देशः-

सर्वेषां पक्षाणां तर्कं श्रुत्वा न्यायालयेन उक्तं यत् अस्य प्रकरणस्य श्रवणं मंगलवासरे न्यायमूर्तिद्वयस्य न्यायाधीशस्य विवेकसिंहठाकुरस्य, न्यायाधीशस्य रोमेशवर्मणः खण्डपीठे भविष्यति। मुख्यन्यायाधीशः गुरमीतसिंह संधावालिया न्यायाधीशः जियालालभारद्वाजः इत्यनयो खण्डपीठेन उक्तं यत् जिला-परिषद् पुनर्सीमांकनसंबद्धायां याचिकायां निर्वाचन- आयोगं पक्षकारं न कृत्वा प्रकरणं तस्मै एव खण्डपीठाय प्रेषितम्, येन पूर्वं तत् प्रकरणं श्रुतम्। खण्डपीठेन उक्तं यत् एषः संवैधानिकः विषयः अस्ति। एकतः राज्यसर्वकारः हिमाचले आगतया आपदा कारणेन पंचायत-निर्वाचनं स्थगयति, अपरतः अन्येन खण्डपीठेन पंचायत- जिला- परिषद्- पुनर्सीमांकनसंबद्धाः संशोधिताः नियमाः निरस्ताः कृताः। एतादृशीषु परिस्थितिषु तदेव उचितं यत् देवेंद्रसिंहनेगीप्रकरणे पुनर्सीमांकन- अधिसूचनां निरस्तां कर्तुंखण्डपीठे अस्य श्रवणं भवेत्।

### न्यायालयस्य टिप्पणी निर्वाचन- आयोजने सर्वकारः दिव्याङ्गवत् अनुभूयते

श्रवणकाले मुख्यन्यायाधीश-युक्तेन खण्डपीठेन टिप्पणी कृता यत् राज्य-सर्वकारः पंचायत-निर्वाचन-आयोजने दिव्याङ्गवत् अनुभूयते। अनेन खण्डपीठेन ५ दिसम्बर २०२५ तमे दिने पंचायतीराज-अधिनियमस्य अन्तर्गतं जिला-परिषद् पंचायत-समिति-परिसीमन (पुनर्सीमांकन) सम्बन्धिनः संशोधित-नियमाः ९(२) निरस्ताः कृताः। न्यायालयेन उक्तं यत् जिलापरिषद् एवं पंचायतसमिति- निर्वाचनक्षेत्रेषु हस्तक्षेपसंबद्धः एतद् प्रावधानम् अनवधानं, अन्यायपूर्णं, अतार्किकं च अस्ति, अधिनियमस्य प्रावधानैः सह संविधानस्य अपि विरोधं दर्शयति। संशोधितः नियमः ९(२) एतत् प्रावधानं करोति यत् पंचायतसमितिक्षेत्रं जिलापरिषदः क्षेत्रीय- निर्वाचनक्षेत्र- निर्माणाय एककं भविष्यति।

### बद्दी- नगरनिगम-अधिसूचना निरस्ता, एकसप्ताहे आपत्तिषु निर्णयः- उच्चन्यायालयः

प्रदेशस्य उच्चन्यायालयेन बद्दी-नगरपरिषदं नगरनिगमं कर्तुं निर्गता अधिसूचना निरस्ता कृताऽस्ति। न्यायाधीशः संदीप शर्मा युक्तेन एकलपीठेन राज्यसर्वकारं तथा सम्बद्ध- अधिकारिणः निर्देशितवान् यत् याचिकाकर्तृभिः दीपेंद्रकुमारसिंगलाप्रमुखैः (मोतिया- प्लाजा- वाणिज्य- समुच्चयस्य निवासीभिः) कृतासु आपत्तिषु १० जनवरीपर्यन्तं निर्णयः क्रियताम्। न्यायालयेन स्पष्टं कृतं यत् किञ्चित् निर्णयं कर्तुं पूर्वं याचिकाकर्तॄणां पक्षः श्राव्यः, ततः पश्चात् युक्तिसंगतः आदेशः पारितव्यः।याचिकाकर्तारः, ये बद्दी-स्थितस्य "मोतिया प्लाजा" इत्यस्य आपणिकाः तथा निवासिनः सन्ति, कथयन्ति यत् प्रस्तावित- नगरनिगम बद्दीसीम्नि समावेशनं वा बहिष्करणं इति विषये तेषाम् आपत्तिषु सर्वकारेण अद्यावधि किमपि न विचारितम्। तेषां मुख्यः आग्रहः अस्ति यत् तेषां क्षेत्रं नगरपरिषदि वा प्रस्तावितनगरनिगमे सम्यक् स्थानं प्राप्नुयात्।न्यायालयेन अवलोकितं यत् पूर्वं १८ दिसम्बर २०२५ तमे दिने "ग्रामपंचायत हरिपुर-संधोली बनाम हिमाचलराज्यम्" इति प्रकरणे अपि खण्डपीठेन नगरनिगमनिर्माण- अधिसूचना निरस्ता कृत्वा आपत्तीनां पुनः श्रवणस्य निर्देशः दत्तः। उल्लेखनीयम् यत् सर्वकारेण २३ दिसम्बर २०२४ तमे दिने बद्दी-नगरपरिषदं नगरनिगमे परिवर्तयितुम् अधिसूचना निर्गता आसीत्, या पश्चात् उच्चन्यायालयस्य खण्डपीठेन तान्त्रिक- आधारेण निरस्ता कृताऽस्ति। वर्तमानकाले बद्दी-नगर-परिषद् एव अस्तित्वे वर्तते।

### तृतीय-सन्तानोत्पत्तौ अपि महिला मातृत्व-अवकाशस्य अधिकारी- उच्चन्यायालयः

हिमाचलप्रदेशस्य उच्चन्यायालयेन मातृत्व-अवकाश-विषये पुनः एकः महत्वपूर्णः आदेशः दत्तः। न्यायाधीशा ज्योत्सना रिवाल दुआ युक्तेन पीठेन स्पष्टं कृतम् यत् यदि कस्याश्चन महिला-कर्मचारिण्याः द्वे सन्ताने स्तः, तर्हि सर्धकारी-सेवायां प्रविष्टायाः पश्चात् तृतीयसन्तानस्य जन्मेऽपि सा मातृत्व- अवकाशस्य अधिकारिणी भविष्यति। न्यायालयेन सर्वकारं तथा सम्बद्धविभागं द्वयोः सप्ताहयोः अन्तर्गतं याचिकाकर्त्रीं मातृत्व- अवकाशविषये विचार्य निर्णयं कर्तुं निर्देशितम्।न्यायालयेन उक्तं यत् अस्य आदेशस्य सर्वे लाभाः याचिकाकर्त्र्यै प्रदेयाः।

# अमरीकीय-आक्रमणानां सूचनानां मध्ये वेनेजुएला देशेन राष्ट्रिय-आपत्कालः घोषितः



**हिमसंस्कृतवार्ताः** - अमरीकीय-आक्रमणानां सूचनानां मध्ये वेनेजुएला-देशेन राष्ट्रिय-आपत्कालः घोषितः । राजधान्यां कराकस्-नगरे अनेकविस्फोटानाम् अनन्तरं वेनेजुएला-प्रशासनम् अमरीका-देशम् अनेकेषु राज्येषु नागरिकाणां सैन्यप्रतिष्ठानानां च उपरि आक्रमणस्य आरोपम् कृतवत् । अत्रान्तरे वेनेजुएलादेशस्य वायवीयक्षेत्रे अमरीकीय वाणिज्यिक उड्डयानानि प्रतिबन्धितानि सन्ति। एतानि आक्रमणानि तस्मिन् समये अभवन् यदा अमरीकीयसैन्यं मादकद्रव्यस्य स्तेयंकरान्नौकान् लक्ष्यं करोति स्म। एतददतिरिच्य अमरीका-देशस्य राष्ट्रपतिः डोणाल्ड् ट्रम्पः अवदत् यत् वेनेजुएला-देशस्य राष्ट्रपतिः निकोलस मादुरो, तस्य पत्न्या सह गृहीतः देशात् बहिः निष्कासितः। गतदिवसे बृहदाक्रमणस्य अनन्तरम् अभवत्। सामाजिक अन्तर्जलीय पटले लिखिते लेखे श्रीट्रम्पः अवदत् यत्, अमरीका-देशः वेनेजुएला देशस्य तस्य नेतुः च विरुद्धं वृहत् प्रहारं सफलतया अकरोत्।

## अमेरिकीराष्ट्रपतिः ट्रम्पः कथयति यत् वेनेजुएलादेशस्य राष्ट्रपतिः निकोलस् मदुरो तस्य पत्नी च गृहीत्वा देशात् बहिः नीता



अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः उक्तवान् यत् वेनेजुएलादेशस्य राष्ट्रपतिः निकोलस् मदुरो तस्य पत्नी च गृहीत्वा देशात् बहिः नीता। गतदिने वेनेजुएलादेशे अमेरिकादेशेन महत् आक्रमणं कृतम्। अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः सामाजिकमाध्यमेषु उक्तवान् यत् अमेरिकीकानूनप्रवर्तनसंस्थाभिः सह सहकार्यं कृत्वा एतत् कार्यं कृतम्। तस्मिन् दिने प्रातःकाले वेनेजुएला-राजधानी-काराकस्-नगरे अनेके बृहत्-विस्फोटाः श्रुताः । अमेरिकी-महान्यायिकः पामेला बोण्डी इत्यनेन उक्तं यत् न्यूयॉर्क-नगरे आरोपानाम् अङ्गीकारस्य अनन्तरं वेनेजुएला-देशस्य निष्कासितः राष्ट्रपतिः निकोलस् मदुरो तस्य पत्नी सिलिया फ्लोरेस् च आपराधिक-आरोपाणां सम्मुखं करिष्यन्ति। सामाजिकमाध्यमेषु एकस्मिन् सन्देशमध्ये अवदत् यत् निकोलस् मदुरो इत्यस्य विरुद्धं मादकद्रव्य-आतङ्कवादस्य षड्यंत्रं, कोकेन-आयातस्य षड्यंत्रं, मशीनगन-विनाशकारी-यन्त्राणि च धारयितुं, अमेरिका-देशस्य विरुद्धं षड्यंत्रं रचयितुं च एतत् प्रत्युत्तरम् अभवत्, यस्य कारणात् अमेरिकीन्यायालयेषु दम्पती शीघ्रमेव न्यायस्य पूर्णबलस्य सम्मुखीभविष्यति।

# धर्मशाला- छात्रामृत्युप्रकरणे मुख्यमंत्रिणः सुक्खोः कार्यविधिः, आरोपी प्राध्यापकः निलम्बितः, महिला- आयोगेनापि प्रतिवेदनं याचितम्



**हिमसंस्कृतवार्ताः - शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खोः आदेशानुसारं हिमाचलप्रदेशस्य राजकीयमहाविद्यालयस्य धर्मशालायाः पूर्वछात्रायाः मृत्युविषये आरोपितः सहायकाचार्यः अशोककुमारः तत्कालप्रभावेण निलम्बितः अस्ति। शनिवासरे सायं शिक्षाविभागेन एषः आदेशः कृतः। शनिवासरे प्रातःकाले सोलनस्य काण्डाघाटे पत्रकारैः सह अनौपचारिक- वार्तालापस्य समये मुख्यमंत्री सुक्खुः इत्यनेन उक्तं यत् धर्मशालायां छात्रया स्वस्य विडियो-वक्तव्ये नामकृतः प्राध्यापकः तत्कालं प्रभावेण निलम्बितः भविष्यति। सः प्राध्यापकस्य निलम्बनस्य आदेशं कृतवान्। दूरभाषकालविवरणसहितं विस्तृतान्वेषणं भविष्यति। सः अवदत् यत् सर्वकारः अस्य सम्बद्धस्य कस्यचित् विरुद्धं कठोरकार्यविधिः करिष्यति।

## उच्चशिक्षानिदेशालयेन अन्वेषणार्थं समितिः निर्मिता-

इदानीं उच्चशिक्षानिदेशालयेन छात्रायाः मृत्युविषये तथ्यनिर्णयं/ प्रारम्भिकजागृतिं कर्तुं अध्यक्षसहिताः सदस्याः सन्ति इति समितिः निर्मिता अस्ति। समितिः शिक्षकैः महाविद्यालयस्य छात्रैः च उत्पीडनस्य, यौन-उत्पीडनस्य, चीरप्रकारस्य, जाति-सम्बद्धानां टिप्पणीनां च सर्वान् पक्षान् कोणान् च समाविष्टं व्यापकं प्रतिवेदनं प्रस्तौति। समित्यै त्रिदिवसाभ्यन्तरे स्वप्रतिवेदनं प्रस्तुतं कर्तुं निर्देशः दत्तः अस्ति। उच्चशिक्षायाः (महाविद्यालयः) अतिरिक्तनिदेशकः डॉ. हरीशकुमारः अध्यक्षः, राजकीयमहाविद्यालयः ढलिलियारा इत्यस्य प्राचार्या डॉ. अंजु आर. चौहान, शासकीय- महाविद्यालयबैजनाथस्य प्राचार्यः डॉ. प्रदीपकुमारकौण्डलः, शासकीयमहाविद्यालय नौरा इत्यस्य प्राचार्यः डॉ. राजेशकुमारः सदस्याः सन्ति। उच्चशिक्षानिदेशालयस्य अधीक्षकश्रेणी- द्वितीयः राकेशवर्मा, अनुसन्धानस्य संचालने, प्रासंगिक- अभिलेख-प्राप्त्यर्थं च समितेः सहायं करिष्यति।

## राष्ट्रीय-राज्यमहिला-आयोग-द्वारा अपि संज्ञानं गृहीतम्

इदानीं राष्ट्रियमहिला-आयोगेन एकस्याः छात्रायाः परपीडनं, शारीरिकप्रहारः, यौन-उत्पीडनं च इति घटनायाः स्वतः संज्ञानं गृहीतम्, यस्मिन् १९ वर्षीयस्य छात्रस्य चिकित्सायाः समये मृत्युः अभवत् आयोगस्य अध्यक्षेन पुलिसमहानिदेशकं प्रति पत्रं लिखित्वा एफआईआर-पत्रस्य तत्कालं पञ्जीकरणं, सर्वेषां अभियुक्तानां धरणं, निष्पक्षसमये च अन्वेषणं, पोस्टमार्टम- चिकित्सा-अभिलेखानां संरक्षणं, भारतीयदण्डसंहिता २०२३, यौन-उत्पीडन-विरोधी विधानानां, राग-विरोधी नियमानाम् अन्तर्गतं कठोर-कार्याणि च सुनिश्चित्य निर्देशः दत्तः अस्ति अपि च, दोषिणः संकायसदस्यानां विरुद्धं विभागीयकार्याणि, महाविद्यालयस्य एण्टी-रैगिंग-तन्त्रस्य समीक्षा, परिसरस्य सुरक्षा, जागरूकता, परामर्शव्यवस्था च सुदृढाः करणीयाः इति निर्देशाः दत्ताः सन्ति। पञ्चदिनान्तरे आयोगाय विस्तृतं कार्यप्रतिवेदनं प्रस्तूय कर्तुं निर्देशः दत्तः अस्ति। राज्यमहिला- आयोगेन अस्य विषयस्य संज्ञानं गृहीतम्। राज्यमहिला- आयोगस्य अध्यक्षा विद्या नेगी इत्यनया पुलिसाधीक्षकः काङ्गड़ा इत्यस्माद् अस्मिन् विषये प्रतिवेदनं आहूतम् अस्ति।

# मुख्यमन्त्री कण्डाघाटे विकलांगशिक्षायां उत्कृष्टताकेन्द्रस्य आधारशिला अस्थापयत् ₹२०० कोटिरूप्यकैः भविष्यति निर्माणम्



**हिमसंस्कृतवार्ताः- सोलनम्।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सोलनमण्डलस्य कण्डाघाटे विकलाङ्गशिक्षा- उत्कृष्टताकेन्द्रस्य शिलान्यासं कृतवान्। अस्मिन् अवसरे मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः समाजस्य प्रत्येकस्य वर्गस्य समावेशीविकासाय कल्याणाय च पूर्णतया प्रतिबद्धः अस्ति। सः अवदत् यत् स्वस्य प्रतिबद्धतायाः अनुरूपं अस्य केन्द्रस्य आधारशिला तदा स्थापिता यदा निर्माणकार्यं प्रायः २५ प्रतिशतं सम्पन्नं भवति स्म। मुख्यमन्त्री उक्तवान् यत् एतत् विकलांगशिक्षा उत्कृष्टताकेन्द्रं ४५ बीघाभूमौ स्थापितं भविष्यति, यत्र २०० कोटिरूप्यकाणां व्ययः भविष्यति। अस्मिन् वर्षे अक्तूबर मासपर्यन्तं अस्य केन्द्रस्य प्रथमचरणस्य कार्यं सम्पन्नं भवेत् इति सः निर्देशं दत्तवान्। केन्द्रे ३०० विकलाङ्गबालानां कृते गुणवत्तापूर्णशिक्षा, क्रीडाङ्गणानि, आवासीयसुविधाः च प्रदत्ताः भविष्यन्ति। अस्मिन् केन्द्रे ५०० किलोवाट-भारस्य नूतनायाः सौरशक्ति-परियोजनायाः स्थापनस्य अपि निर्देशं कृतवान्।मुख्यमंत्री सुखविन्दरसिंहसुक्खुः अवदत् यत् एषा संस्था विकलाङ्गानाम् उच्चशिक्षा, विशेषशिक्षा, कौशलविकासः च सम्बद्धाः पाठ्यक्रमाः प्रदास्यति। विकलाङ्गतायाः स्वरूपं तीव्रताम् च अवलोक्य अनुसन्धानविकासकार्यक्रमाः अपि क्रियन्ते। सः अपि अवदत् यत् सामाजिकसुरक्षाप्रदानं, दिव्याङ्गजनसहिताः समाजस्य वंचितवर्गस्य सशक्तिकरणं च उद्दिश्य अनेकाः महत्त्वाकांक्षिणः योजनाः सर्वकारः प्रभावीरूपेण कार्यान्वितं करोति। विकलाङ्गानाम् उच्चशिक्षायाः प्रवर्धनार्थम् उत्कृष्टताकेन्द्रस्य स्थापनायाः प्रतिज्ञां कृतवान् आसीत्, अद्यत्वे एतत् लक्ष्यं साकारं जातम्। सः अवदत् यत् एतत् राज्ये अपाङ्गजनानाम् शिक्षायाः कृते एतत् प्रकारस्य प्रथमं केन्द्रम् अस्ति, सम्पूर्णस्य देशस्य कृते आदर्शरूपेण उद्भवति। सः अपि अवदत् यत् अस्य संस्थानस्य अन्तः ₹15.33 कोटिरूप्यकाणां व्ययेन महिलानां कृते कार्यरतं छात्रावासमपि निर्मितं भविष्यति।

# नियमानुसारं जलविद्युत् परियोजनाभ्यः भूमिराजस्वं संग्रहीतुं राज्यस्य अधिकारः- मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः राज्ये विविधजलविद्युत्परियोजनानां विकासकैः सह सभायाः अध्यक्षतां कुर्वन् भूराजस्वस्य विशेषमूल्यांकनस्य विषये विस्तरेण चर्चां कृतवान्। मुख्यमन्त्री विकासकान् अवदत् यत् हिमाचलप्रदेशः प्राकृतिकसंसाधनैः समृद्धम् अस्ति। राज्ये विविधजलविद्युत्परियोजनानां विकासकानां दायित्वं भवति यत् ते राज्याय भूराजस्वं दातुं शक्नुवन्ति। एतत् राजस्वं प्राप्तुं राज्यस्य अधिकारः अस्ति। सः अवदत् यत् राज्ये संचालिताः सर्वाभिः जलविद्युत्परियोजनाभिः नियमानुसारं भूमिराजस्वं दातव्यम्। भूमिराजस्वदेयस्य दरं युक्तियुक्तं कर्तुं चर्चाः कर्तुं शक्यन्ते। सः अवदत् यत् राजस्वमन्त्री जगतसिंहनेगी इत्यस्य अध्यक्षतायां अस्मिन् विषये २५ मेगावाट् जलविद्युत्परियोजनानां विकासकैः सह १२ जनवरी दिनाङ्के शिमलानगरे सभा भविष्यति।
मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः राज्याय आवंटितानां संसाधनानाम् इष्टतमम् उपयोगं राज्यस्य जनानां हिताय विकासाय च सुनिश्चितं करोति। सः अवदत् यत् जलविद्युत् परियोजनाविकासकानाम् समस्यानां सार्थकं समाधानं अन्वेष्टुं राज्यसर्वकारस्य दायित्वम् अस्ति। मुख्यमंत्री सुक्खुः अवदत् यत् राज्यसर्वकारेण हिमाचलप्रदेशं स्वावलम्बनं समृद्धं च राज्यं कर्तुं अनेके निर्णयाः कृताः। सः अवदत् यत् राज्येन केन्द्रसर्वकाराद्, समीपस्थराज्येभ्यः च स्वस्य अधिकारस्य दृढतया पक्षम् अकरोत्। सः अवदत् यत् राज्येन बीबीएमबी परियोजनासु स्थायीसदस्यतां, १९६६ तः २०११ पर्यन्तं अवशिष्टांशं प्रायः ₹६,५०० कोटिरूप्यकाणां तत्कालं विमोचनस्य च आग्रहः कृतः।

# HPBOSE TET RESULT :

## विद्यालयीयशिक्षामंडलेन टेटपरीक्षायाः परिणामः घोषितः ३३०८३ मध्ये केवलं ८४५९ अभ्यर्थिनः उत्तीर्णाः

हिमसंस्कृतवार्ताः - डॉ पद्मनाभः, धर्मशाला ।हिमाचलप्रदेश- विद्यालयीय-शिक्षामण्डलेन दशविषयेषु आयोजितायाः अध्यापकपात्रतापरीक्षायाः (टेट्) परिणामः घोषितः। अस्यां परीक्षायां ३३०८३ अभ्यर्थिनः भागं गृहीतवन्तः, तेषु केवलं ८४५९ अभ्यर्थिनः उत्तीर्णाः अभवन्, यत् २५.६ प्रतिशतं परिणामम् अस्ति। अपि च परीक्षाकाले अनुकरणकर्मणि संलग्नौ द्वौ अभ्यर्थिनौ एकवर्षपर्यन्तं अयोग्यौ (डिस्क्वालिफाइड्) घोषितौ स्तः।प्राप्तसूचनानुसारं हिमाचलप्रदेशविद्यालयीयशिक्षामण्डलेन नवम्बरमासे दश विषयेषु अध्यापक पात्रता परीक्षायाः आयोजनं कृतम् आसीत्। अस्यां परीक्षायां कुलं 36,571 अभ्यर्थिनः आवेदनं कृतवन्तः, तेषु 33,083 अभ्यर्थिनः परीक्षायां उपस्थिताः आसन्।

# सार्थकयोगशालायोगासनक्रीडाकादम्याः भव्यम् उद्घाटनम्




## कण्वनगरी अधुना योगकारणात् सार्थकतामवाप्नोत् - ऋतुखण्डूरी (विधानसभाध्यक्षा)

### *योगक्षेत्रे राकेशकण्डवालस्य विद्यते महायोगदानम्*

कोटद्वारम्। कुलदीपमैन्दोला।सार्थकयोगशालायोगासन-क्रीडाकादम्याः विधिवतं भव्यं च उद्घाटनं माननीयाविधानसभाध्यक्षया श्रीमती-ऋतुखण्डूरी-भूषणमहाभागया करकमलैः सम्पन्नम्। अस्मिन् शुभावसरे राजनीतिक्षेत्रात् आरभ्य शिक्षाजगत्, शिक्षकसंघाः, क्रीडा–योगक्षेत्रे सम्बद्धाः च अनेके गणमान्यजनाः उपस्थिताः आसन्।उद्घाटनसमारोहस्य अवसरे प्रसिद्धयोगप्रेमिभिः सह प्रायः द्विशतपञ्चाशत् (२५०) जनानां गरिमामयी उपस्थितिः कार्यक्रमं दिव्यं भव्यं च अकरोत्। अस्मिन् अवसरे राजगौरवः, नमनभटनागरः (जिलापरामर्शकः), मम युवाभारत – युवा-कल्याण-क्रीडा-मन्त्रालयः, भारतसरकारः), गुरुकुलमहाविद्यालय-कण्वाश्रमस्य पूज्यः स्वामीजी, श्री मनमोहननौटियालमहाभागः (प्रधानाचार्यः), आधुनिकभीमवैदिकगुरुकुलः, कण्वाश्रमः), अन्ताराष्ट्रिय पादकन्दुक-प्रशिक्षकः श्री सुनीलरावतमहाभागः तथा "डिस्कवर-उत्तराखण्ड24 न्यूज " इत्यस्य मुख्यसम्पादकः श्री अम्बेशपन्तमहाभागः विशिष्टातिथिरूपेण उपस्थिताः आसन्।विधानसभाध्यक्षया कथितं यत् कण्वनगरी अधुना योगकारणात् धन्या अभवत् एतादृशाः लघुबालकाः बालिकाः महिलाः पुरुषाः शिक्षकाः सामाजिकाः लाभान्विताः भवन्ति। राकेशकण्डवालेन एवं सार्थककण्डवालेन च सोनमरावतद्वारा अधुना कण्वनगर्यां विश्वव्यापी योगः सार्थकः कृतः । अकादम्याः अध्यक्षया कविताकण्डवालद्वारा योगशालायाः भव्यस्वरूपः प्रदत्तः तदर्थं तस्यै च योगसपरिवाराय बहूनि वर्धापनानि।कार्यक्रमे भारतस्वाभिमान-ट्रस्ट्-कोटद्वारतः श्री जुयालमहाभागः, 'क्रिएटिव-पब्लिक-स्कूल' इत्यस्य सञ्चालकः दीपकगौड़महाभागः, एम.के.वी.एन. विद्यालयस्य प्रधानाचार्या, श्री शिवानन्दलखेड़ामहाभागः, मेजर् जयवीरमहाभागः, मनमोहनचौहानमहाभागः, श्री पारितोषरावतमहाभागः, पसबोला महाभागः, श्रीकान्तमहाभागः, इन्द्रमोहनजखमोलामहाभागः, बागम्बरसिंहमहाभागः, भारतभूषणनेगीमहाभागः (पार्षदः, शिवपुरम्), श्री प्रशान्तकुकरेतीमहाभागः, कुलदीपमैन्दौलामहाभागः, रोशनगोड़महाभागः तथा दीपकजदली, पंकजध्यानीमहाभागः एवं च अनेके गणमान्यनागरिकाः उपस्थिताः आसन्।अस्मिन् अवसरे सार्थकयोगशालायाः बालयोगिभिः प्रस्तुतं योगासन-प्रदर्शनं सर्वेषां मनांसि आकर्षितवान्। राष्ट्रियस्तरस्य स्वर्णपदक-विजेता बालयोगी सार्थककण्डवालः स्वस्य उत्कृष्टया योगमय्या प्रस्तुत्या दर्शकान् विस्मयमग्नान् अकरोत्। तथैव यतिका , यशवी , संस्कृतिः, अधीरा तथा वाची इत्येताः बालयोगिन्यः अपि स्व-प्रभावशालिना प्रदर्शनैः प्रचुरां करतलध्वनिं अलभन्त। एवं सार्थकयोगशालायोगासनक्रीडाकादम्याः उद्घाटनसमारोहः अत्यन्तं सफलः, स्मरणीयः च दर्शनीयश्चाभवत्।



महेशनारायणशास्त्री
कुरेडा, टोङ्क,राजस्थानम्

## दर्पणः

दर्पण!
त्वं निर्बलः सन्नपि
वक्षि मनोभावान्
निर्भयो भूत्वा
पक्षपाताद् विना।

नो फुल्लसि प्रशंसया,
न च त्रुट्यसि मानभङ्गेन,
योऽस्ति समक्षं तस्मै तथैव
समर्पयसि त्वं
तटस्थीभूय विमलात्मना।

त्वत्तो वयमात्मानं रक्षामो
यदाऽसहजं तथ्यमाभाति ते
अथ च दोषिणं त्वां मन्महे
यदा दर्शयसि चर्मसङ्कोचम्
आस्यगतम्।

दर्पण!
तव निर्बलत्वमेव ते बलम्
यतस्त्वं नासि परिवर्तनशीलः
न नतो भवसि
केवलं तथ्यं प्रदर्शयसि
तथा यथास्ति सः।

कदाचिन् मानवोऽपि
दर्पणनिभोऽभविष्यत्
तर्हि संसृतौ कठिनतमं
कर्म मिथ्याकथनम्
अभविष्यत्।

# स्वामिविवेकानन्दकनिष्ठमहाविद्यालये सावित्रीबाईफुलेजयन्तीः हर्षोल्लासेन आचरिता



**हिमसंस्कृतवार्ताः- जलगावः, महाराष्ट्रराज्यम्)**

के. सी. ई. संस्थान-संचालिते स्वामिविवेकानन्द- कनिष्ठ-महाविद्यालये, मु. जे. महाविद्यालये, क्रान्तिज्योतिः सावित्रीबाई फुले इत्यस्याः जयन्ती अत्यन्तं हर्षोल्लासेन प्रेरणादायकेन च वातावरणेन आचरिता। अस्यां जयन्त्यां महाविद्यालयस्य उपप्राचार्यः आर. बी. ठाकरे, पर्यवेक्षिका सौ. स्वाती बऱ्हाटे, प्राध्यापकः उमेश पाटील च प्रमुखरूपेण उपस्थिताः आसन्। महाविद्यालयस्य सर्वेऽपि प्राध्यापकवर्गाः, बहुसंख्यकाः छात्राश्च कार्यक्रमे उत्साहेन सहभागी अभवन्। कार्यक्रमस्य शुभारम्भः पर्यवेक्षिकया सौ. स्वाती बऱ्हाटे इत्यनया सावित्रीबाई फुले महोदयायाः प्रतिमायै पुष्पहारार्पणेन कृतः। ततः उपस्थितैः सर्वैः महती श्रद्धया तस्याः महनीयकार्याणां स्मरणं कृतम्। अस्मिन् प्रसङ्गे प्रमुखवक्तारः प्रा. एस. के. वानखेडे महोदयः सावित्रीबाई फुले इत्यस्याः जीवनचरितं विस्तरेण निरूपितवान्। प्रतिकूलपरिस्थितिषु अपि स्त्रीशिक्षणप्रसारार्थं कृतं तस्याः महान् संघर्षः विद्यार्थिभ्यः प्रेरणास्वरूपेण प्रस्तुतः। अद्यतनकालेऽपि तस्याः विचाराः समाजमार्गदर्शकाः सन्तीति तेन प्रतिपादितम्।कार्यक्रमस्य सूत्रसञ्चालनं प्रा. दीपक चौधरी महोदयेन अत्यन्तं सुबोधतया प्रभावपूर्णतया च कृतम्। सम्पूर्णे कार्यक्रमे छात्राणां उत्स्फूर्तः सहभागः विशेषतया दृष्टिगोचरः आसीत्। अस्य कार्यक्रमस्य सफलतार्थं सांस्कृतिक- कार्यक्रमसमितेः अध्यक्षः प्रा. एस. के. वानखेडे, प्रा. शिन्दे, प्रा. उमेश ठाकरे च सह सर्वैः प्राध्यापकैः अमूल्यं सहकार्यं प्रदत्तम्। सावित्रीबाई फुले इत्यस्याः शिक्षणविचाराः समाजसुधारणायाः आदर्शाः च भावीपीढीपर्यन्तं प्रेषयितुम् अयं कार्यक्रमः नितान्तं प्रेरणादायकः अभवत्।




# गाजोलमहाविद्यालये छात्रसप्ताहोत्सवे अन्नमहोत्सवः पालितः







**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, गाजोल, मालदा।** गाजोलमहाविद्यालये छात्रसप्ताहोत्सवे अन्नमहोत्सवः भित्तिपत्रिकाप्रतियोगिता च सम्पन्ना छात्राणां सर्वाङ्गीणविकासं सांस्कृतिकचेतनां च प्रोत्साहयितुं गाजोलमहाविद्यालयस्य उपक्रमेण स्टूडेन्टस वीक सेलिब्रेशन- २०२६ इत्यस्य अवसरं प्राप्य भव्यः अन्नमहोत्सवः भित्तिपत्रिकाप्रतियोगिता च आयोजितः। अद्य दिनाङ्के ३ जनवरी २०२६ गाजोलमहाविद्यालयस्य प्राङ्गणे महान् उत्साहः उल्लासश्च दृश्यते स्म। अस्मिन् कार्यक्रमे मुख्यपोषकत्वेन गाजोलमहाविद्यालयस्य संचालनसमितेः अध्यक्षः अजीत विश्वासः उपस्थितः आसीत्। संचालनसमितेः सदस्यः माननीयः प्रसूनरायः अपि कार्यक्रमे भागं जग्राह। महाविद्यालयस्य अध्यापकप्रधानः डॉ. मनोजकुमारभोजः महोदयः पृष्ठपोषकत्वेन दायित्वं निर्वहन् कार्यक्रमस्य शोभां वर्धितवान्। सम्पूर्णकार्यक्रमस्य आह्वायकत्वं शिक्षकपरिषदः सचिवः डॉ. निरंकुशचक्रवर्ती महोदयः अकरोत्। अस्य कार्यक्रमस्य मुख्यपरामर्शदातृरूपेण अध्यापिका समाप्तिपाल, डॉ. दीपंकरकुण्डुः स्वमहत्त्वपूर्णं योगदानं दत्तवन्तौ।
अन्नमहोत्सवे महाविद्यालयस्य दशविभागानां छात्राः छात्रिकाश्च भागं गृहीत्वा विंशतिः अन्नस्तलान् अलंकृतवन्तः। ग्राम्यबङ्गालस्य पारम्परिकस्वादात् आरभ्य विभिन्नप्रदेशानां लोकप्रियाणि भोजनानि अत्र प्रदर्शितानि। अन्नसिद्धता- प्रस्तुतीकरणयोः आधारितः प्रतियोगितापि आयोजितः, यत्र सहभागिनां सृजनशीलता कौशलं च परीक्षितम्। विविधविभागानां भित्तिपत्रिकाः अपि सर्वेषां दृष्टिं आकर्षितवन्ति। निर्णायकत्वेन सामसी- महाविद्यालयस्य विभिन्नविभागानाम् अध्यापकाः स्थानीयपत्रकाराश्च उपस्थिताः आसन्। वक्तृत्वकाले संचालनसमितेः सदस्यः प्रसूनरायः छात्राणां नवोन्मेषशक्तिं सामूहिककार्यस्य महत्त्वं च प्रशंसितवान्। एतादृशैः कार्यक्रमैः छात्राणां आत्मविश्वासः सामाजिककौशलं च वर्धते इति सः अभिप्रायं व्यक्तवान्। अध्यापकप्रधानः डॉ. मनोजकुमारभोजे महोदयः अपि अवदत् यत् अध्ययनस्य सह सहशैक्षिकक्रियाकलापाः छात्रजीवनस्य अविभाज्यः अङ्गः सन्ति, ये भविष्यज्जीवनाय छात्रान् सुसज्जान् कुर्वन्ति।कार्यक्रमस्य समापनकाले आयोजकसमितेः पक्षतः मुख्यपरामर्शदात्री अध्यापिका समाप्तिपाल सर्वेषां प्रति कृतज्ञतां प्रकटयित्वा स्वेच्छासेवकानां भूयसीं प्रशंसाम् अकरोत्। आनन्दोत्साहसौहार्दपूर्णे वातावरणे सम्पन्नः अयम् अन्नमहोत्सवः प्रतियोगिताश्च गाजोलमहाविद्यालयस्य छात्रसप्ताहोत्सवं विशेषगौरवं दत्तवन्तौ।



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। अद्यतन-वृत्तान्तेषु प्रथमा वार्ता बेङ्गलूरु-नगरात् आगता। तत्र एकया महिलया मार्ग-सङ्कुलतायाः महती समस्या प्रदर्शिता। तया सप्तशत-पञ्चाशत्- मीटर- परिमितं दूरं गन्तुम् एकविंशति-निमेषाः यापिताः।
**काव्या-** नमस्ते नन्दिनि। सत्यम् एव, बेङ्गलूरु-नगरस्य मार्ग-सङ्कुलता तु सर्वत्र प्रसिद्धा अस्ति। तया तावान् कालः यापितः इति अतीव कष्टकरम्। इदानीं द्वितीया वार्ता श्रूयताम्। एकस्मिन् कार्य-स्थले केनचित् स्वामिना रुग्णः कर्मचारी स्थलप्रसारणम् प्रेषयितुम् आदिष्टः। एतत् तु अनुचितम् एव।
**नन्दिनी-** सत्यं वदसि। कर्मचारिणः वैयक्तिक-एकान्तता स्वामिना भग्ना। एतत् कार्यं केनापि न सोढम्। अधुना विज्ञानस्य वार्तां पश्य। ईलोन-मस्क-वर्येण कथितं यत् 'ग्रोक्' इति कृत्रिम-बुद्धिः वैद्यात् अपि श्रेष्ठतया विकिर-चित्राणां परीक्षणं कृतवती अस्ति। एषा बुद्धिः अनेकान् प्राणान् रक्षितवती अस्ति।
**काव्या-** अहो, यन्त्राणि वैद्यानां स्थानं स्वीकृतवन्ति सन्ति। एतत् तु विस्मयकरम् एव। अन्या वार्ता अपि महत्त्वपूर्णा अस्ति। अद्य 'विश्व-अन्तर्मुखि-दिवसः' मान्यते। अस्मिन् दिने अन्तर्मुखि-जनानां विशिष्टाः गुणाः श्लाघिताः।
**नन्दिनी-** शोभनम्। अन्तर्मुखि-जनानां शक्तिः अपि महती भवति। अद्य एतावत् एव। धन्यवादाः।

# पौषपूर्णिमायां प्रथमस्नानपर्वणि कोटिशः भक्ताः संगमे पवित्रं स्नानं कृतवन्तः



संगमस्य पवित्रवालुकासु श्रद्धासागरः उदग्रः अस्ति। गंगा, यमुना, अदृश्यसरस्वती च इत्येतासां नदीनां सङ्गमे शनिवासरे महता धूमधामेन माघमेलापकः आरब्धः। पौषपूर्णिमायां प्रथमस्नानपर्वणि कोटिशः भक्ताः संगमे पवित्रं स्नानं कृतवन्तः। ४४ दिवसान् यावत् चलिष्यमाणः अयं ऐतिहासिकः माघमेला न केवलं धार्मिकः कार्यक्रमः अपितु सनातनपरम्परायाः, संस्कृतेः, सुरक्षाव्यवस्थायाः च अद्भुतम् उदाहरणं वर्तते, यत्र प्रशासनं कोटिकोटिभक्तानाम् स्वागताय पूर्णतया सज्जं वर्तते। प्रयागराजनगरे माघमेलायाः प्रथमस्नानपर्वणः पौषपूर्णिमा-उत्सवस्य अवसरे प्रायः २८ लक्षं जनाः सायं ५ वादनपर्यन्तं पवित्रं स्नानं कृतवन्तः एतावता वाराणसी-नगरस्य विभिन्नेषु घाटेषु ११ लक्षं भक्ताः गङ्गायाम् स्नानं कृतवन्तः । अयोध्यायां स्नात्वा सार्धषट् लक्षं मथुरायां च चतुर्लक्षम्। संगमस्य भूमौ प्रथमस्नानपर्वतः पौषपूर्णिमायाः प्रथमस्नानात् आरभ्य १५ फरवरी दिनाङ्के महाशिवरात्रिस्नानपर्वपर्यन्तं ४४ दिवसान् यावत् चलिते माघमेलायां १२ तः १५ कोटिपर्यन्तं भक्ताः आगमिष्यन्ति इति अनुमानितम् अस्ति

# बाङ्लादेशे निरन्तरं क्रूरता , सम्मर्दपीडितप्रकरणानन्तरं हिन्दूव्यापारिणः दुःखदमृत्युः

बाङ्गलादेशे साम्प्रदायिकहिंसायाः न्यूनतायाः लक्षणं न दृश्यते यत् फरवरी २०२६ तमे वर्षे निर्धारितसामान्यनिर्वाचनात् पूर्वं हिन्दुजनाः निरन्तरं लक्ष्यं क्रियन्ते। नवीनतमघटनायां शरीयतपुरमण्डले क्रूरजनसमूहप्रहारेन घातितः हिन्दुव्यापारी खोकनचन्द्रदासः उपचारकाले मृतः। नववर्षस्य पूर्वसंध्यायां (३१ दिसम्बर्) आक्रमणानन्तरं तस्य स्थितिः गम्भीरा आसीत् । विगतसप्ताहद्वये हिन्दुषु आक्रमणानां चतुर्थः प्रमुखः घटना अस्ति। एकः जनसमूहः अपि एकं भिक्षुकं स्तम्भे बद्ध्वा चोरीशङ्केन तं ताडितवान् । सुमन इति परिचिता पीडितायाः स्थितिः गम्भीरा अस्ति, सा चिकित्सालये स्थापिता अस्ति। प्रारम्भिकपरिचयः सूचयति यत् सः बाङ्गलादेशस्य हिन्दुमार्गनिवासी आसीत् ।